गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।आप्रीसूक्तं (१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ इळः, ४ बर्हिः, ५ देवीर्द्वारः, ६ उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः )।त्रिष्टुप्, ७ जगती

**समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ्विश्वानि भुवनान्यस्थात्।**
**होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन्॥ २.००३.०१**

समिद्धः- उद्दीपितः। अग्निः- पावकः सर्वभूतहितक्रतुर्वा। पृथिव्याम्- भूम्यां शरीरे वा। निहितः। प्रत्यङ्- अभिमुखः सन्। विश्वानि- सर्वान्। भुवनानि- लोकान् भूमिका वा। अस्थात्- अधितिष्ठति। होता- देवाह्वाता। पावकः- शोधकः। प्रदिवः- प्रकाशकः। सुमेधाः- शोभनबुद्धिसम्पन्नः। देवः- द्योतनशीलः। अग्निः- पावकः सर्वभूतहितक्रतुः। अर्हन्- पूज्यः सन्। देवान्- द्योतनशक्तीः। यजतु- यच्छतु पूजयतु सङ्गमयतु ॥१॥

**नराशंसः प्रति धामान्यञ्जन्तिस्रो दिवः प्रति मह्ना स्वर्चिः।**
**घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान्॥ २.००३.०२**

नराशंसः- पुण्यश्लोकः। धामानि प्रति- साधनभूमिकाः प्रति। अञ्जन्- प्रकाशयन्। स्वर्चिः- शोभनप्रकाशः। तिस्रो दिवः- भूर्भुवःसुवर्लोकान्। प्रति। मह्ना- स्वमहिम्ना व्याप्नुवन्। घृतप्रुषा- ज्योतिर्मयेन। मनसा- स्वचित्तेन। हव्यम्। उन्दन्- स्निग्धीकुर्वन्। यज्ञस्य- उपासनस्य। मूर्धन्- उच्चस्थाने। देवान्। समनक्तु- व्यक्तीकरोतु ॥२॥

**ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य।**
**स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम्॥ २.००३.०३**

Dr Ranganji
WEBOLIM

नः- अस्माकम्। मनसा। ईळितः- स्तुतः सन्। अग्ने। अर्हन्- पूज्यः सन्। मानुषात् पूर्वः- प्रत्यक्षतः। अद्य- इदानीम्। देवान्। यक्षि- सङ्गमय। सः- तादृशस्त्वम्। मरुतां शर्धः- प्राणगणम्। अच्युतम्- च्युतिरहितम्। इन्द्रम्- ईशनाधिदैवतम्। आ वह। नरः- हे उपासकाः। बर्हिषदम्- दर्भासनस्थितं चित्ताकाशस्थितं वा अग्निम्। यजध्वम्- पूजयध्वम्॥३॥

**देव॑ ब॒र्हिर्वर्ध॑मानं सु॒वीरं॑ स्ती॒र्णं॑ रा॒ये सु॒भरं॒ वेद्य॒स्याम्।**
**घृ॒तेना॒क्तं व॑सवः सीदते॒दं विश्वे॑ देवा आदित्या य॒ज्ञिया॑सः॥ २.००३.०४**

देव बर्हिः- दर्भासनं चित्तासनं वा। वर्धमानम्। सुवीरम्- शोभनवीर्यसम्पन्नम्। स्तीर्णं- विस्तृतम्। अस्याम्- एतस्याम्। वेदी- वेद्याम्। राये- दानयोग्यधनाय। सुभरम्- हव्यं सुष्ठु धृतम्। घृतेनाक्तम्- दीप्त्या स्निग्धम्। इदम्- एतत्त्वाम्। यज्ञियासः- उपास्याः। आदित्याः- अखण्डप्रकृतिजाः। वसवः- शरण्याः। वस निवासे। विश्वे देवाः। सीदत- यूयमधितिष्ठत उपविशत लब्धभूमिका भवत॥४॥

**वि श्र॑यन्तामुर्वि॒या हू॒यमा॑ना॒ द्वारो॑ दे॒वीः सु॑प्राय॒णा नमो॑भिः।**
**व्यच॑स्वती॒र्वि प्र॑थन्तामजु॒र्या वर्णं॑ पुना॒ना य॒शसं॑ सु॒वीर॑म्॥ २.००३.०५**

उर्विया- विस्तृतानि। नमोभिः- नमस्कारैः। हूयमाना- आहूतानि। देवीः- देवताभूतानि। सुप्रायणा- सुष्ठु गतिभूतानि। द्वारः- द्वाराणि। वि श्रयन्ताम्- अपावृतानि सन्तु। व्यचस्वतीः- व्याप्तानि। अजुर्याः- अहिंसितानि। वर्णं- वरणीयस्य। यशसम्- कीर्तिमतः। सुवीर्यं- सुवीर्यस्य। पुनानाः- शोधकानि। प्रथन्ताम्- प्रख्यातानि भवन्तु॥५॥

**सा॒ध्वपां॑सि स॒नता॑ न उक्षि॒ते उ॒षासा॒नक्ता॑ व॒य्ये॑व रण्वि॒ते।**
**तन्तुं॑ त॒तं सं॒वय॑न्ती समी॒ची य॒ज्ञस्य॒ पेशः॑ सु॒दुघे॒ पय॑स्वती॥ २.००३.०६**

Dr. Ranganji
WEBOLIM

नः- अस्माकम्। साधु- साधूनि। अपांसि- कर्माणि प्रति। सनता- सनातनकालतः। उक्षिते- पूजिते। वय्येव- वादनकुशले इव। रण्विते- स्तुते। उषसानक्ता- निशाप्रभात्यौ। निशा मनुष्यप्रज्ञा। प्रभाती दैवीप्रज्ञा। ततम्- विस्तृतम्। तन्तुम्। यज्ञस्य पेशम्- दानस्य पूजायाः सङ्गतिकरणस्य अवयवात्मकम्। संवयन्ती। समीची- सङ्गते। सुदुघे- शोभनदोग्ध्र्यौ । पयस्वती- ज्ञानवत्यौ भवथः ॥६ ॥

**दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा।**
**देवान्यजन्तावृतुथा समञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु॥ २.००३.०७**

दैव्या- दिव्यौ। होतारा- देवाह्वातारौ। प्रथमा- मुख्यौ। विदुष्टरा- विद्वत्तमौ। ऋजु- आर्जवेन। यक्षतः- पूजयन्तौ। समृचा वपुष्टरा- मन्त्रात्मकदेहौ। ऋतुथा- काले। देवान्। यजन्तौ- पूजयन्तौ। पृथिव्याः- भूम्याः। नाभा- मुख्यस्थाने यज्ञे। त्रिषु सानुषु अधि- भूर्भुवःसुवर्लोकेषु। समञ्जतः- व्यक्तीकुर्वन्तौ भवतः ॥७ ॥

**सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः।**
**तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य॥ २.००३.०८**

नः- अस्माकम्। धियम्। साधयन्ती- सम्पन्नां कुर्वती। सरस्वती- रसचोदयित्री। इळा देवी- वाग्देवी। विश्वतूर्तिः- सर्वप्रेरयित्री। भारती- स्थूलसूक्ष्मवाचां भरणशीला। तिस्रो देवीः। स्वधया- आत्मधारणया। इदम्- एतत्। शरणम्- सदनम्। बर्हिः- दर्भासनं चित्ताकाशं वा। अच्छिद्रम्- अविच्छिन्नम्। आ- आभिमुख्येन। निषद्य- उपविश्य। पान्तु- रक्षन्तु ॥८ ॥

**पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः।**
**प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः॥ २.००३.०९**

Dr. Ranganji
WEBOLIM

पिशङ्गरूपः- दीप्तः। सुभरः- शोभननिर्वाहकः। वयोधाः- अन्नधारकः। श्रुष्टी- वेगवान्। वीरः। देवकामः। जायते। त्वष्टा- शिल्पाधिदेवता। अस्मे- एतस्मै। नाभिम्- मुख्याम्। प्रजाम्। वि स्यतु- विमुञ्चतु। अथ- ततः। देवानाम्। पाथः- अन्नम्। अप्येतु- अस्मानभिगच्छतु ॥९॥

**व॒नस्पति॑रवसृ॒जन्नुप॑ स्थाद॒ग्निर्ह॒विः सू॑दयाति॒ प्र धी॒भिः।**
**त्रिधा॒ सम॑क्तं नयतु प्रजा॒नन्दे॒वेभ्यो॒ दैव्यः॑ शमि॒तोप॑ ह॒व्यम्॥ २.००३.१०**

वनस्पतिः- सम्भजनशीलपालकोऽरण्यपालको वा। अग्निः- पावकः सर्वभूतहितक्रतुः। अवसृजन्- दिव्यभावना उत्पादयन्। उप स्थात्- उपतिष्ठति। धीभिः- चित्तधारणाभिः। प्र- प्रकर्षेण। हविः- हव्यम्। सूदयाति- संस्करोति। शमिता- शमगुणयुक्तः। दैव्यः- दिव्यः। त्रिधा समक्तम्- त्रिधा अन्नप्राणमनोभिः संस्कृतम्। हव्यम्- चरुपुरोडाशध्यानभावनादिहव्यम्। देवेभ्यः। प्रजानन्। उप नयतु ॥१०॥

**घृ॒तं मि॑मिक्षे घृ॒तम॑स्य॒ योनि॑र्घृ॒ते श्रि॒तो घृ॒तम्व॑स्य॒ धाम॑।**
**अ॒नु॒ष्व॒धमा व॑ह मा॒दय॑स्व॒ स्वाहा॑कृतं वृषभ वक्षि ह॒व्यम्॥ २.००३.११**

घृतम्- पूतनवनीतोपलक्षितपूतभावनाम्। मिमिक्षे- सिञ्चामि। अस्य- एतस्य। घृतम्- दीप्तिर्भावनाक्षरणं वा। योनिः- सदनम्। घृते- दीप्तौ भावनाक्षरणे वा। श्रितः- सर्वभूतहितक्रतुः श्रितः। अस्य- एतस्य सर्वभूतहितक्रतोरग्नेः। घृतम्- दीप्तिर्वा भावनाक्षरणं वा। धाम- सद्म। अनुष्वधम्- आत्मधारणानुसन्धानम्। आ वह। मादयस्व- आनन्दय। वृषभ- वर्षक। स्वाहाकृतम्-मन्त्राह्वानपूर्विकम्। सुष्ठु आभिमुख्येन आह्वानं स्वाहा। ह्वेञ् शब्दे। हव्यम्- चरुपुरोडाशध्यानभावनादिहव्यम्। वक्षि- आवह ॥११॥

Dr. Rangaji

WEBOLIM